Revelation

# શ્રીરમણહૃદયમ્

## Document Information

Text title : ramaNahRidayam

File name : ramaNahRidayam.itx

Category : hRidaya, deities_misc, ramaNa-maharShi, gurudev

Location : doc_deities_misc

Author : Componsed by K.Lakshmana Sarma

Transliterated by : Sunder Hattangadi

Proofread by : Sunder Hattangadi

Description-comments : Ramanashram Publication www.sriramanamaharshi.org

Acknowledge-Permission: Sri V.S. Ramanan, President, Sri Ramanasramam sriramanamaharshi.org

Latest update : November 3, 2014

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 1, 2025

*sanskritdocuments.org*

# શ્રીરમણહૃદયમ્

વિષયાનુક્રમણિકા (શ્લોકસંખ્યા)


૧ ગ્રન્થાવતરણમ્ ।  (૧-૩)
૨ મઙ્ગલમ્ ।  (૪-૫)
૩ વિવેકપ્રકરણમ્ ।  (૬-૨૭)
૪ સાધનપ્રકરણમ્ ।  (૨૮-૩૪)
૫ અનુભવપ્રકરણમ્ ।  (૩૫-૪૫)
૬ સત્સઙ્ગપ્રકરણમ્ ।  (૪૬-૫૧)
૭ અદ્વૈતપ્રકરણમ્ ।  (૫૨-૫૭)
૮ સાધકાચારપ્રકરણમ્ ।  (૫૮-૬૩)
૯ ઉપાસનાપ્રકરણમ્ ।  (૬૪-૭૩)
૧૦ જીવન્મુક્તપ્રકરણમ્ ।  (૭૪-૭૯)
૧૧ પરોક્ષજ્ઞાનપ્રકરણમ્ ।  (૮૦-૮૫)
૧૨ સિદ્ધાન્તસારપ્રકરણમ્ ।  (૮૬)


==========================================

॥ ૐ નમો ભગવતે શ્રીરમણાય ॥

॥ શ્રીરમણહૃદયમ્ ॥

॥ ગ્રન્થાવતરણમ્ ॥

હૃદ્ગેહેઽહમહન્તયાખિલવપુષ્યન્તઃ સ્ફુરન્ સર્વદા
નૈજાનાં નિજતત્ત્વરૂપમમૃતં સન્દર્શયિષ્યન્ સ્વયમ્ ।
પ્રેમ્ણા સ્વીકૃતવાનજો નરવપુર્યોઽસૌ ગુરૂણાં ગુરુઃ
વન્દે શ્રીરમણાભિધં મુનિવરં તં સ્વાત્મનાથં પરમ્ ॥ ૧॥

પ્રેમ્ણા યં રમણો મુનિર્વ્યરચયદ્ ગ્રન્થં નિજાનાં મુદે
દ્રાવિડ્યા નિજતત્ત્વરૂપમમૃતં સન્દર્શયન્તં સ્ફુટમ્ ।
તચ્છક્ત્યા તમનૂદ્ય કોઽપિ વિનતશ્ચક્રે તદીયઃ કૃતિં

ગૈર્વાણ્યા સરલામિમાં રમણહૃન્નામ્નીં મનશ્શાન્તયે ॥ ૨॥

યાઽગમ્યા વચસો ધિયોઽપિ પદવી નિર્વાસના ચિન્મયી
ગત્વા યાં ન નિવર્તતે મુનિવરસ્તસ્યાં દિશન્ નિર્વૃતિમ્ ।
સદ્યશ્ચાપિ દદન્મુદં વિજયતે સંવિન્મયો ભાસ્કરઃ
સંસેવ્યઃ સતતં મુમુક્ષુભિરયં ગ્રન્થો મુનીશોદિતઃ ॥ ૩॥

॥ મઙ્ગલમ્ ॥

અસ્તીત્યસ્મિન્ કથં ધીર્ભવતિ યદિ ન સત્ ? તદ્વિભિન્ના નુ સચ્ચિત્ ?
સત્યં નિશ્ચિન્તનં તદ્ભવતિ હૃદિ યતસ્તસ્ય હૃન્નામકસ્ય ।
ધ્યાતા કો વાસ્તિ ભિન્નો ? ભવતિ ચ તદિદં ધ્યાનગમ્યં કથં તુ ?
તસ્ય ધ્યાનં હૃદન્તઃ પ્રશમિતમનસા તન્મયત્વેન નિષ્ઠા ॥ ૪॥

મૃત્યોર્બિભ્યતિ યે ભૃશં સુમનસઃ, સર્વાન્તરં તે શિવં
યાન્તીશં શરણં પરં વિરહિતં મૃત્યુદ્ભવાભ્યાં સ્વયમ્ ।
સાકં તન્મમતાભિરેતિ નિધનં તેષામહન્તા તતઃ
સ્યાત્ તેષાં મરણસ્ય ધીઃ કિમુ પદે નિત્યે ગતાનાં સ્થિતિમ્ ॥ ૫॥

॥ વિવેકપ્રકરણમ્ ॥

પશ્યામો ભુવનં યતો, ભવતિ સત્ તન્મૂલમેકં પરં
યચ્છક્તેઃ પરિણામભૂતમખિલં; નૈતદ્વિવાદાસ્પદમ્ ।
આખ્યારૂપમયં ચ ચિત્રમિદમપ્યાધારવસ્ત્રં દ્યુતિઃ
દ્રષ્ટા ચેતિ ચતુષ્ટયં સ પરમો યઃ સ્વાત્મભૂતો હૃદિ ॥ ૬॥

વિશ્વં જીવપરૌ વદેત્ પ્રથમતઃ સર્વં જગત્યાં મતં
એકં સત્ ત્રિવિધં પ્રતીયત ઇતિ, ત્રીણ્યેવ તાનીત્યપિ ।
વાદૌ યાવદહં મતિર્વપુષિ; તાં હિત્વા તુ સમ્મોહિનીં
સ્વસ્મિન્નેવ પદે સ્થિતિર્ભવતિ યા સર્વોત્તમા સૈવ હિ ॥ ૭॥

વાદૈઃ કિં ભવિતા જગદ્ભવતિ સન્મિથ્યાભ્રમશ્ચિજ્જડં
આનન્દં નનુ દુઃખમેવ તદિતિ ? ત્યક્ત્વા સમસ્તં જગત્ ।
સ્વાત્માનં સમવેત્ય સત્યમમલં દ્વૈતૈક્યવાદાતિગે
યાહન્તારહિતા સ્થિતિર્નિજપદે સર્વાદૃતા સૈવ હિ ॥ ૮॥

રૂપી સ્વો યદિ રૂપમસ્તુ જગતો રૂપં પરસ્યાપ્યુત
વીક્ષા કેન કથં ચ રૂપરહિતઃ સ્વાત્મા યદિ સ્યાદ્દૃદ ? ।

દૃશ્યં કિં નુ દૃશોઽન્યથા વદ ભવેદ્ ? દૃક્ સા સ્વ એવં સ્વયં
નિસ્સીમા નિરુપાધિકા ચિતિમયી સા નિષ્પ્રપઞ્ચાદ્વયા ॥ ૯॥

દેહો યન્નિખિલસ્ય ચાપિ ભુવને સ્યાત્ પઞ્ચકોશાત્મકઃ
કોશાનામપિ પઞ્ચકં તત ઇદં દેહાભિધાનં ભવેત્ ।
સત્યેવં વદ દેહતઃ કિમુ જગદ્ભિન્નં ભવેત્ તત્ત્વતઃ ?
કિં કેનાપિ ચ વીક્ષિતં જગદિદં દેહં વિના પ્રોચ્યતામ્ ॥ ૧૦॥

શબ્દાદીન્ વિષયાન્ વિહાય જગતો રૂપં ભવેન્નો પૃથક્
એવં ધીન્દ્રિયપઞ્ચકસ્ય વિષયો નિશ્શેષમેતજ્જગત્ ।
એતૈઃ પઞ્ચભિરિન્દ્રિયૈર્જગદિદં હ્યેકં મનો બુધ્યતે
સત્યેવં મનસો જગત્ કથય કિં ભિન્નં ભવેત્ તત્ત્વતઃ? ॥ ૧૧॥

વિશ્વં બુદ્ધિરિતિ દ્વયં સમુદિયાલ્લીયેત ચાપ્યેકવત્
એવં સત્યયિ ભાસ્યતે જડમિદં વિશ્વં ધિયૈવાખિલમ્ ।
યસ્મિંસ્તદ્વિતયસ્ય જન્મવિલયૌ ભાસ્વત્યનસ્તોદયે
સજ્જાનીહિ તદેવ પૂર્ણમમલં ચિદ્રૂપકં કેવલમ્ ॥ ૧૨॥

રૂપે કુત્રચિદાખ્યયાપિ ચ કયાઽપ્યારાધનં ભક્તિતો
રૂપાખ્યારહિતસ્ય યદ્યપિ ભવેત્ તસ્યેક્ષણાય ક્રમઃ ।
તત્ત્વે તસ્ય નિજં ચ વીક્ષ્ય વિલયં ગત્વાપિ તસ્મિન્ પરે
તેનાભિન્નતયા સ્થિતિર્નિજપદે વીક્ષા ભવેત્ તત્ત્વતઃ ॥ ૧૩॥

સંશ્રિત્ય પ્રભવન્ત્યહમ્મતિમિમાં સર્વાસ્ત્રિપુટ્યસ્તથા
દ્વન્દ્વાન્યપ્યુત સમ્ભવન્તિ; તદહન્નામા ભવેત્ કો ન્વિતિ ।
અન્વેષાદ્ હૃદયં પ્રવિશ્ય યદિ તત્તત્ત્વં સમાલોકયેત્
સર્વં તદ્વિગલેત્ સ્વયં, સ ચ ભવેજ્જ્ઞાની, સ નૈતિ ભ્રમમ્ ॥ ૧૪॥

અજ્ઞાનાન્ન પૃથક્ કદાપિ જગતિ જ્ઞાનં ભવેત્ કુત્રચિત્
નાજ્ઞાનં ચ કદાપિ કસ્યચિદપિ જ્ઞાનાત્ પૃથક્ સમ્ભવેત્ ।
અન્વેષાદહમિત્યયં ભવતિ કો યસ્યોભયં સ્યાદિતિ
મૂલાત્માવગતિઃ સ્વયં સમુદિતા જ્ઞાનં ભવેન્નેતરત્ ॥ ૧૫॥

જ્ઞાતારં સ્વમજાનતોઽન્યવિષયજ્ઞાનં ભવે યદ્ભવેત્
જ્ઞાનં તદ્ભવિતા કથં નુ કથય? જ્ઞાનસ્ય ચાન્યસ્ય ચ ।
આધારોઽહમિતીહ યો ભવતિ, તત્તત્ત્વં વિજાનાતિ ચેત્
અજ્ઞાનેન સમં તદા પ્રવિલયં તાનં ચ ગચ્છેદિદમ્ ॥ ૧૬॥

જ્ઞાનાજ્ઞાનવિવર્જિતં ભવતિ યજ્જ્ઞાનં વિજાનીહિ તત્
જ્ઞાનં વૈષયિકં ત્વવેહિ કિમપિ જ્ઞાનં યથાર્થં ન હિ ।
જ્ઞાતૃજ્ઞેયવિવર્જિતો વિલસતિ હ્યાત્મા સદૈકઃ સ્વયં
જ્ઞાનાત્મૈવ ભવત્યસૌ; ન સ ભવેચ્છૂન્યાત્મકઃ કર્હિચિત્ ॥ ૧૭॥

આત્મા જ્ઞાનમયો ય એષ ગદિતસ્સત્યસ્સ એવાદ્વયો
જ્ઞાનં નામ બહુપ્રકારમિદં ત્વજ્ઞાનમેવાખિલમ્ ।
સ્વસ્માજ્જ્ઞાનમયાત્ સતસ્ત્વસદિદં નો ભિદ્યતે કર્હિચિત્
નાનાસન્ત્યપિ ભૂષણાનિ કથય સ્વર્ણાત્ સતોઽન્યાનિ કિમ્? ॥ ૧૮॥

ભાતિ ત્વં સ ઇતિ દ્વયં, સમુદિતાહધીઃ શરીરે યદા
તત્ત્વં કિં ન્વહમો મમેદિતિ ધિયા સ્વાન્વેષણેન સ્વયમ્ ।
નીતેઽસ્મિન્નિધનં, સમં તદિતરપ્રજ્ઞે તતો નશ્યતોઃ
યદ્ભાત્યેકતયા તદા, ગણય તત્ તત્ત્વં ભવેદાત્મનઃ ॥ ૧૯॥

સંશ્રિત્યૈવ હિ વર્તમાનમુભયં ભૂતં ભવિષ્યત્ સ્થિતં
સ્વે કાલેઽપિ ચ વર્તમાનમુભયં; તદ્વર્તમાનં ત્રયમ્ ।
સત્યેવં પ્રવિહાય બોધમધુના સદ્વસ્તુનોઽન્વેષણાત્
ભૂતાગામવિચારણં ગણનવત્ સ્યાદેકસઙ્ખ્યાં વિના ॥ ૨૦॥

કાલો દેશ ઇમૌ પૃથક્ કિમહમો?ઽધીનાસ્તયોઃ સ્મો વયં
દેહાઃ સ્યામ યદિ સ્વયં; કિમુ વયં દેહા ભવામો વદ ।
સર્વત્રાપિ ચ સર્વદાપિ ચ વિભાત્યાત્મા સમાનો યતઃ
તસ્માત્સન્તમવેહિ કેવલમમું તૌ દ્વૌ નિગીર્ય સ્થિતમ્ ॥ ૨૧॥

સ્વો દેહો ભવતિ દ્વયોરવિદુષો વિજ્ઞાતતત્ત્વસ્ય ચ
સ્વં દેહાવધિકં પૃથક્ પરવિભોરજ્ઞો જનો મન્યતે ।
જ્ઞસ્ય સ્વો વપુષોઽન્તરહિતોઽભિન્નઃ પરસ્માદ્વિભોઃ
ભાત્યેવં મહતી ભિદાસ્તિ હિ તયોઃ સ્વજ્ઞસ્ય ચાજ્ઞસ્ય ચ ॥ ૨૨॥

સત્યં હ્યેવ જગદ્વયોરવિદુષો વિજ્ઞાતતત્ત્વસ્ય ચ
સત્યં યાવદિદં જગત્ તુ મનુતે સજ્જ્ઞાનહીનો જનઃ ।
જ્ઞસ્યાકારવિહીનમસ્ય નિખિલસ્યાધારભૂતં હિ સત્
ભાત્યેવં મહતી ભિદાસ્તિ હિ તયોસ્સજ્જ્ઞસ્ય ચાજ્ઞસ્ય ચ ॥ ૨૩॥

મધ્યે દૈવધિયોર્જયં પ્રતિ ભવેત્ તેષાં વિવાદે રતિઃ

ધીદૈવદ્વિતયસ્ય મૂલમહમિત્યેકં ન જાનન્તિ યે ।
અન્વેષાદવગત્ય તત્ત્વમહમસ્તાભ્યાં વિમુક્તો મુનિઃ
સંસક્તો ભવિતા તયોઃ કિમુ પુનઃ સ્વજ્ઞાનહીનો યથા ॥ ૨૪॥

દ્રષ્ટારં સ્વમુપેક્ષ્ય પશ્યતિ નરો રૂપં પરેશસ્ય ચેત્
સા રૂપસ્ય મનોમયસ્ય હિ ભવેદ્વીક્ષા ન સત્યા વિભોઃ ।
તત્ત્વં સ્વં કિમુ ન પ્રપશ્યતિ પરં ત્વસ્યેક્ષકો વા મુનિઃ?
નષ્ટાહઙ્કૃતિરેષ કિઞ્ચિદપિ નો ભિન્નઃ પરસ્માદ્વિભોઃ ॥ ૨૫॥

વીક્ષા સ્વસ્ય પરસ્ય ચેતિ ગદિતં ગ્રન્થેષુ વીક્ષાદ્વયં
તત્તત્ત્વં કિમિતિ બ્રવીમિ; ઘટતે વીક્ષા કથં ન્વાત્મનઃ? ।
એકત્વાન્ન સ વીક્ષ્યતે યદિ, પરં વીક્ષેત કો વા કથં?
ઈશસ્યૌદનભાવમેવ ગણય સ્વેક્ષાં પરેક્ષામપિ ॥ ૨૬॥

ચૈતન્યદ્યુતિમેષ ચિન્મયતનુર્મત્યૈ પ્રયચ્છન્ સ્વયં
આત્મત્વેન સદૈવ ભાતિ હિ મતેરન્તસ્તુરીયશ્શિવઃ ।
તત્ તસ્મિન્ વિનિયોજનં હૃદિ મતેરન્તર્મુખીકૃત્ય તાં
હિત્વા તં પ્રભવેત્ કથં વદ પરં મત્યૈવ મન્તું નરઃ ॥ ૨૭॥

॥ સાધનપ્રકરણમ્ ॥

ચૈતન્યેન વિવર્જિતં વપુરિદં નાહઙ્કરોતિ સ્વયં
બ્રૂતે નૈવ કદાપિ કોઽપિ ભુવને નાસં સુષુપ્તાવિતિ ।
સર્વં ચાપ્યુદિયાદિદં સમુદિતે ત્વસ્મિન્નહન્નામકે
તદ્બુદ્ધ્યા શિતયા કુતોઽયમુદિયાદિત્યેવમન્વેષય ॥ ૨૮॥

બ્રૂયાન્નાહમિતિ સ્વયં જડવપુઃ, સત્યા ચિતિર્નોદિયાત્
તન્મધ્યે તુ વપુઃ પ્રમાણમહમિત્યાવિર્ભવેત્ કિઞ્ચન ।
એતદ્ધ્યેવ ભવેન્મનો જડચિતોર્ગ્રન્થિર્ભવોઽહઙ્કૃતિઃ
બન્ધઃ સૂક્ષ્મશરીરમેતદુદિતં જીવસ્ય તત્ત્વં સ્વયમ્ ॥ ૨૯॥

ધૃત્વા રૂપમુદેતિ ચ સ્થિતિમુત પ્રાપ્નોતિ રૂપગ્રહાત્
ધૃત્વા રૂપમુતોપભુજ્ય વિષયાનુચ્ચૈસ્તમાં વર્ધતે ।
*સંસારે બત વર્ધતે ચ નિતરાં રૂપાશનો નિત્યશઃ । - ઇતિ પાઠાન્તરઃ
હિત્વા રૂપનુપાદદીત નવમપ્યન્વિષ્યતે ચેત્ તદા
ધાવેદ્રૂપવિહીન એષ સહસાહન્તાપિશાચો ધ્રુવમ્ ॥ ૩૦॥

એતસ્મિન્નહમાખ્યકે સમુદિતે સર્વં જગચ્ચોદિયાત્
નો ચેદસ્ત્યહમિત્યયં ન ચ ભવત્યેતજ્જગત્ કિઞ્ચન ।
તત્સર્વં હ્યહમાખ્યકઃ સ્વયમતઃ કોઽસૌ કુતસ્સમ્ભવેત્
ઇત્યેવં નિજમાર્ગણં ભવતિ યત્ તત્ સર્વહાનં ભવે ॥ ૩૧॥

તત્ર સ્યામ હિ તદ્વયં ભવતિ નો યત્રોદયોઽહઙ્કૃતેઃ
ચેતસ્તુ પ્રવિશેદહઞ્જનિભુવં નો ચેદહન્તા કથમ્ ।
નીયેતાપુનરુદ્ભવાં મૃતિમિયં નીતા તથાન્તં ન ચેત્
સાધ્યા નસ્સહજા સ્થિતિઃ કથમસૌ યસ્યાં વયં તત્ સ્વયમ્? ॥ ૩૨॥

યત્કિઞ્ચિત્ સલિલાશયે નિપતિતં ચિન્વન્નિમજ્જેદ્યથા
તદ્વદ્વાગનિલૌ નિયમ્ય જગતશ્ચિન્તાં વિહાયાખિલામ્ ।
અન્વેષાદુદિયાત્ કુતોઽહમિતિ ધીરિત્યેવમેકાગ્રયા
બુદ્ધ્યાન્તર્હૃદયે નિમજ્જ્ય વિમલં વિદ્યાત્ સ્વતત્ત્વં પરમ્ ॥ ૩૩॥

રુધ્વા વાઙ્મનસી ઉભે, ચિતિરહંરૂપા ક્વ ભાતીત્યલં
બુદ્ધ્યાન્વિષ્ય નિમજ્જનં હૃદિ નિજજ્ઞાનાપ્તયે સાધનમ્ ।
દેહો નાયમહં સ્વયં તદહમિત્યેવં નિદિધ્યાસનં
અન્વેષાઙ્ગમવેહિ; કિં નુ ભવિતા સોઽયં વિચારો નિજઃ? ॥ ૩૪॥

॥ અનુભવપ્રકરણમ્ ॥

કોઽહં સ્યામિતિ માર્ગણોદ્યમવશાદન્તર્મુખે માનસે
હૃલ્લીને સતિ, લજ્જયા નતમુખે ચાસ્મિન્નહન્નામકે ।
ચૈતન્યં વિમલં તદાહમહમિત્યાભાતિ કિઞ્ચિત્ સ્વયં
મિથ્યાહં ન હિ તત્, સદેવ પરમં પૂર્ણં સ્વતત્ત્વં શિવમ્ ॥ ૩૫॥

કર્તવ્યં કિમિહાસ્ત્યમુષ્ય કૃતિનોઽહન્તાં ગ્રસિત્વોદિતે
ભાવે સ્વે મુદિતસ્ય તન્મયતયા શાન્તે તુરીયે શિવે ।
સ્વાન્યત્ કિઞ્ચન વેત્તિ નો નિજપદે નિષ્ઠાં ગતોઽસૌ યતો
મન્તું તાં પદવીં નરો વદ કથં નિર્માનસીં શક્નુયાત્? ॥ ૩૬॥

નિષ્ઠાં તત્ ત્વમસીતિ વેદશિરસા દિષ્ટામલબ્ધ્વા નિજાં
કોઽહં સ્યામિતિ માર્ગણેન હૃદયં બુદ્ધ્યા પ્રવિશ્ય સ્વયમ્ ।
ધીર્દૌર્બલ્યવશાત્ કરોતિ મનુજો ધ્યાનં તદેવાસ્મ્યહં
નો દેહોઽહમિતિ; સ્વયં તદનિશં ભાત્યાત્મરૂપેણ હિ ॥ ૩૭॥

હાસાર્હં ભવતિ દ્વયં ચ, ગદિતં જાને ન મામિત્યહં
જાને મામિતિ ચોદિતં; વિષયતાં સ્વસ્યૈવ નેતું સ્વયમ્ ।
આત્માનં, કિમુ કત્યચિદ્વદ ભવેદાત્મદ્વયં કુત્રચિત્?
આત્મૈકો ભવતીતિ વિદ્ધ્યનુભવાલ્લોકે સમસ્તસ્ય ચ ॥ ૩૮॥

આત્મત્વેન સમસ્તજન્તુષુ સદા સત્યં હૃદન્તઃ સ્ફુરત્
અન્વેષાદવગત્ય તન્મયતયા નિષ્ઠામલબ્ધ્વા નિજામ્ ।
સત્ કિઞ્ચિદ્ભવતીતિ નેતિ તદિદં રૂપીતિ નેત્યેકકં
દ્વેધા નોભયથેતિ વા વિવદતે માયાભિભૂતો જનઃ ॥ ૩૯॥

સિદ્ધં સ્વં સમવેત્ય તન્મયતયા નિષ્ઠા ભવેદ્યા નિજા
સિદ્ધિસ્સૈવ હિ; સિદ્ધયસ્તદિતરાઃ સ્વપ્નોપલબ્ધા ઇવ ।
સ્વપ્નાર્થઃ કિમુ સન્ પ્રબોધસમયે? મુક્તોઽનૃતાદન્તતો
નિષ્ઠામેત્ય સતિ સ્વયં મુનિવરઃ કિં તાસુ મોહં વ્રજેત્ ॥ ૪૦॥

દેહોઽસ્મીત્યુદિયાન્નરસ્ય ધિષણા યાવત્ તુ નાહં વપુઃ
તદ્ધ્યસ્મીત્યનુચિન્તનં હિતકરં તાદાત્મ્યનિષ્ઠાપ્તયે ।
કુર્યાદ્ ધ્યાનમિદં કિમર્થમનિશં? ધ્યાયેન્નરોઽસ્મીતિ કિં
લોકે કોઽપિ નરો? વયં હિ સતતં સત્યં તદેવ સ્વયમ્ ॥ ૪૧॥

યાવત્સાધકતા નરસ્ય ભવતિ દ્વૈતં યથાર્થં ભવેત્
સાધ્યે ત્વદ્વયતેતિ ચાપિ ગદિતં નો સત્યમુક્તં ભવેત્ ।
અન્વિષ્યન્નપિ સાદરં ચ દશમં નષ્ટત્વબુદ્ધ્યા સ્વયં
સ્વં લબ્ધ્વાપિ ચ કો બભૂવ દશમાદન્યઃ કથાયામસૌ ॥ ૪૨॥

કર્તાત્મા સ્વયમેવ ચેત્ કૃતિફલં ભુઞ્જીત સોઽયં સ્વયં
કર્તાહં ક ઇતિ સ્વમાર્ગણવશાજ્જાનાતિ ચેત્ સ્વં વિભુમ્ ।
કર્તૃત્વં વિગલેદ્યતો, વિગલિતં તેનૈવ સાકં ભવેત્
કર્માપિ ત્રિવિધં સ્વયં; સ્થિતિમિમાં નિત્યાં વિમુક્તિં વિદુઃ ॥ ૪૩॥

બદ્ધોઽસ્મીતિ મતિર્ભવેદ્યદિ તદા મુક્તેર્મતિશ્ચોદિયાત્
બદ્ધોઽહં ક ઇતિ સ્વમાર્ગણવશાત્ સ્વે નિત્યમુક્તે સ્વયમ્ ।
શિષ્ટે સત્યજરેઽમરે વદ ભવેદ્બન્ધસ્ય ચિન્તા કથં?
સા નો ચેદિદુયાત્, તદાસ્ય કૃતિનો મોક્ષસ્ય ચિન્તા કથમ્ ॥ ૪૪॥

મુક્તી રૂપવતીતિ રૂપરહિતા સેતિ દ્વિધા સેત્યપિ
વાદા યે મતિભેદતોઽત્ર વિષયે તત્ત્વં બ્રવીમિ સ્ફુટમ્ ।

યોઽહન્નામક એવમત્ર વિમૃશેદ્વાદેષુ તત્ત્વં મુધા
તસ્યાત્યન્તિકનાશ એવ ભવિતા તત્ત્વં વિમુક્તેઃ સ્વયમ્ ॥ ૪૫॥

॥ ઉત્તરભાગઃ ॥

॥ મઙ્ગલશ્લોકઃ ॥

યસ્મિન્નેવ ભવેત્ સ્થિતં જગદિદં યસ્યૈવ સર્વં જગત્
યસ્માત્સર્વમિદં ભવેત્સમુદિતં યસ્મૈ સમસ્તં ભવેત્ ।
યેનેદં નિખિલં જગત્ સમુદિયાત્ સર્વં યદેવ સ્વયં
સત્યં ગુપ્તધનં તદેવ હૃદયે તત્સત્ પરં ધીમહિ ॥ ૪૬॥

॥ સત્સઙ્ગપ્રકરણમ્ ॥

સત્સઙ્ગસ્ય નિષેવણેન મનુજો નિસ્સઙ્ગતાં પ્રાપ્નુયાત્
નિસ્સઙ્ગત્વવશાદસાવુત મનોમોહેન મુક્તો ભવેત્ ।
નિર્મોહત્વમુપૈતિ ચેદથ પરે ગત્વા લયં નિશ્ચલે
જીવન્મુક્તિપદં વ્રજેદનુપમં સેવસ્વ તત્સઙ્ગતિમ્ ॥ ૪૭॥

સાધ્યં યત્ પરમં પદં સુખમયં મર્ત્યૈર્વિચારાન્નિજાત્
સત્સઙ્ગાભ્યસનોદિતાચ્છિતધિયા હૃન્મજ્જનાપાદનાત્ ।
શાસ્ત્રાર્થાધિગમેન નો ભવતિ તન્નો બોધકોક્તિશ્રુતેઃ
નો પુણ્યૈરપિ કર્મભિર્બહુવિધૈરન્યૈશ્ચ નો સાધનૈઃ ॥ ૪૮॥

સદ્ભિસ્સઙ્ગતિમાદરેણ મનુજઃ સેવેત યો ભાગ્યવાન્
એતૈઃ કિં નિયમૈરમુષ્ય નિખિલૈર્નિઃશ્રેયસપ્રાપ્તયે ।
શીતો દક્ષિણમારુતો વહતિ ચેત્ સન્તાપશાન્તિ દિશન્
હસ્તેન વ્યજનં વિધૃત્ય ભવિતા કિં બ્રૂહિ કાર્યં પુનઃ ॥ ૪૯॥

તાપં કેવલમેકમેવ શમયેન્નૄણાં હિમાંશુસ્તથા
દૈન્યં કલ્પકપાદપો દિવિભવઃ પાપં તથા જાહ્નવી ।
સાધૂનામવલોકનાત્ ત્રયમિદં તાપાદિકં યાસ્યતિ
નો તેષામુપમાસ્તિ કાપિ સદૃશી લોકત્રયે કુત્રચિત્ ॥ ૫૦॥

તીર્થાન્યમ્બુમયાનિ નૈવ મહતાં તુલ્યાનિ તેષાં કદા-
પ્યેવં દૈવતમૂર્તયોઽપ્યુપલમૃન્માત્રાશ્ચ સમ્પૂજિતાઃ ।
તૈર્મર્ત્યોઽમિતકાલતો વિમલતાં પ્રાપ્નોતિ ભક્ત્યા યુતઃ
સાધૂનામવલોકનેન મનુજઃ સદ્યો ભવેન્નિર્મલઃ ॥ ૫૧॥

॥ અદ્વૈતપ્રકરણમ્ ॥

કો દેવઃ સયાદ્યો મનો વેત્તિ સોઽયં
જાનામ્યેતજ્જીવનામાહમેવ ।
તસ્માત્ સ ત્વં; વક્તિ સાક્ષાચ્છ્રુતિશ્ચા-
પ્યેકો દેવઃ સર્વભૂતેષ્વપીતિ ॥ ૫૨॥

કિં જ્યોતિસ્તવ ભાનુમાનહનિ મે રાત્રૌ પ્રદીપાદિકં
કિં જ્યોતિસ્તદવેક્ષણાય નયનં તસ્યેક્ષણે કિં મનઃ ।
તસ્યેક્ષા વદ કેન તત્ સ્વયમહં પશ્યામિ તજ્જ્યોતિષાં
જ્યોતિસ્ત્વં ભવસિ સ્વયં વિભુ પરં સત્યં તદેવાસ્મ્યહમ્ ॥ ૫૩॥

હૃદયકુહરમધ્યે કેવલં બ્રહ્મમાત્રં
હ્યહમહમિતિ સાક્ષાદાત્મરૂપેણ ભાતિ ।
હૃદિ વિશ મનસા સ્વં ચિન્વતા મજ્જતા વા
પવનચલનરોધાદાત્મનિષ્ઠો ભવ ત્વમ્ ॥ ૫૪॥

અમલાપ્યચલાહમિત્યજસ્રં
વિલસન્તી હૃદયામ્બુજે ચિદેવ ।
વિતરેત્ પદવીં સ્વયં વિમુક્તેઃ
યદિ જહ્યાન્મનુજો વપુષ્યહન્તામ્ ॥ ૫૫॥

દેહં મૃણ્મયવજ્જડાત્મકમહમ્બુદ્ધિર્ન તસ્યાસ્તતો
નાહં તત્તદભાવસુપ્તિસમયે સિદ્ધાત્મસદ્ભાવતઃ ।
કોઽહમ્ભાવયુતઃ કુતો વરધિયા દૃષ્ટ્વાત્મનિષ્ઠાત્મનાં
સોઽહંસ્ફૂર્તિતયારુણાચલશિવઃ પૂર્ણો વિભાતિ સ્વયમ્ ॥ ૫૬॥

લેભે જનિં યઃ પરમે સ્વમૂલે
વિચાર્ય કસ્માદહમિત્યુદારઃ ।
સ એવ જાતઃ સ ચ નિત્યજાતો
નવો નવોઽયં સતતં મુનીન્દ્રઃ ॥ ૫૭॥

॥ સાધકાચારપ્રકરણમ્ ॥

હિસ્વાહધિયમત્ર દોષનિલયે દેહે જડેઽનાત્મનિ
નિત્યાનન્દમયં સ્વતત્ત્વમમલં જાનીહિ સચ્ચિન્મયમ્ ।
યો મર્ત્યો વપુષસ્તુ પોષણરતો જ્ઞાતું સ્વમિચ્છત્યસૌ

ગ્રાહં દારુધિયા પ્રગૃહ્ય સરિતં પુંસસ્તિતીર્ષોસ્સમઃ ॥ ૫૮॥

યો દેહાત્મમતિક્ષયો ભવતિ તદ્દાનં ચ યજ્ઞસ્તપો
ધર્મઃ સત્યવચઃ પરેશકરુણા યોગોઽપિ ભક્તિઃ પરા ।
ન્યાસો મૌનમપિ સ્થિતિશ્ચ સહજા કામાર્થમોક્ષા અપિ
શાન્તિર્ધીર્મૃતિવર્જિતં ચ મરણં જ્ઞાનં ચ સત્યં સ્વયમ્ ॥ ૫૯॥

કસ્યૈતાનિ કૃતિર્વિભક્તિરપિ ચાજ્ઞાનં વિયોગોઽપિ ચ
સન્તીત્યાત્મવિચાર એવ ભવિતા કર્માદિયોગક્રમાઃ ।
યસ્યાં નાસ્તિ વિચારકોઽહમિધો ન સ્યાદિદં ચાષ્ટકં
સા સત્યા સ્થિતિરિત્યવેહિ વિમલા સ્વાત્માનુભૂતિઃ શિવા ॥ ૬૦॥

સ્વં શક્ત્યા પરમસ્ય ચાલિતમવિજ્ઞાયોદ્યતો યોઽખિલાઃ
સિદ્ધીઃ સાધયિતું સ એવ મનુજો યદ્વત્ સ પઙ્ગુર્નરઃ ।
યોઽવાદીદ્ભવિતા શ્રમો મમ કિયાનેતાન્ વિજેતું રિપૂન્
મામુત્થાપ્ય નિવેશયેર્યદિ રણે તેષાં પુરસ્તાદિતિ ॥ ૬૧॥

યા શાન્તિર્મનસઃ સ્વયં ભવતિ સા મુક્તિર્બુધૈઃ કીર્તિતા
યા પારૈર્મનસોઽધિકૈર્ભવતિ યલ્લાભસ્તુ તાસ્સિદ્ધયઃ ।
તા લબ્ધું જડધીર્યતેત મનુજો યસ્તેન લભ્યં કથં
સ્યાન્મુક્તેસ્સુખમન્તહીનમમલં ચિત્તોપશાન્ત્યાત્મકમ્ ॥ ૬૨॥

પરે વહતિ ભૂભરં ભરમિદં મૃષાજીવકો
    વહન્ ભવતિ ગોપુરોદ્વહનબિમ્બતુલ્યો હ્યસૌ ।
ભરં શિરસિ ધારયન્નતિભરક્ષમેણાનસા
    વ્રજન્ ભજતિ ચેદ્વ્યથાં ભવતિ તત્ર કો દોષવાન્ ॥ ૬૩॥

॥ ઉપાસનાપ્રકરણમ્ ॥

ઉપરિ ચ જઠરાદુરસો મધ્યે બહુવર્ણકેષુ ષટ્સ્વેકમ્ ।
કુવલયકલિકાસદૃશં દક્ષિણભાગેઽઙ્ગુલદ્વયે હૃદયમ્ ॥ ૬૪॥

આવૃતમસ્તિ તદાસ્યં વિયતિ તદન્તર્ભવતિ નાડ્યશ્ચ ।
તમસોઽપિ વાસનાનાં ભવનમિદં પ્રાણચિત્તદીપ્તીનામ્ ॥ ૬૫॥

ગુહેશાખ્યોઽસૌ યો નિવસતિ ગુહાયાં હૃદિ પરઃ
સ એવાસ્મીત્યેવં સતતમનનાત્ સોઽહમિતિ ચેત્ ।
મતિઃ સ્થૈર્યં ગચ્છેદ્વપુરહમિતિ પ્રત્યય ઇવ

તદાજ્ઞાનં નશ્યેત્ તમ ઇવ પુરસ્તાદ્દિનમણેઃ ॥ ૬૬॥

મુકુરે બિમ્બિતમિવ યસ્યાન્તઃ
    વિલસતિ બહિરિવ જગદિદમખિલમ્ ।
સર્વેષામપિ હૃદયાખ્યં તત્
    કિં ન્વિતિ પૃચ્છતિ રામે ભગવાન્ ॥ ૬૭॥

આહ વસિષ્ઠો હૃદય દ્વેધા
    હેયં ચાદેયમિતિ જ્ઞેયમ્?
દેહસ્યાઙ્ગં પલમયમેકં
    જીરજ્જડમપિ હેયં જ્ઞેયમ્ ॥ ૬૮॥

અન્યત્ પ્રજ્ઞામયમાદેયં
    હૃદયં બિમ્બિતમખિલં યસ્મિન્ ।
બહિરન્તસ્તન્ન બહિર્નાન્તઃ
    સમ્પત્તીનાં નિધિરખિલસ્ય ॥ ૬૯॥

તસ્મિન્ મુખ્યે હૃદયે નિષ્ઠાં
    ગતવતિ ચેતસિ નૈજવિચારાત્ ।
ભવતિ સ્વયમપિ નિર્ગન્ધસ્વં
    વિરતિર્વાયોરપિ ભવતીતિ ॥ ૭૦॥

સર્વોપાધિવિમુક્તં યચ્છિવમનિશં ચિદાત્મકં ભાતિ ।
તત્ સ્વયમહમિત્યનિશં ધ્યાત્વા નિખિલા વ્યપોહયાસક્તીઃ ॥ ૭૧॥

સર્વાશ્ચાપિ દશા વિચાર્ય પરમં યચ્છેષિતં સત્પદં
તત્ સંશ્રિત્ય કુરુષ્વ કર્મ ભુવને કામૈર્ગૃહીતો યથા ।
ભાવાનાં સમવૈષિ તત્ત્વમમૃતં દૃષ્ટિં સમાલમ્બ્ય તાં
ઇચ્છાપ્રેરિતવત્ પ્રશાન્તમનસા લોકે ક્રિયાવાન્ ભવ ॥ ૭૨॥

મિથ્યોલ્લાસિતહર્ષભાગચલધીર્મિથ્યાધૃતોદ્વેગવાન્
મિથ્યાગર્હણસમ્ભ્રમઃ કુરુ મૃષારમ્ભઃ ક્રિયા લૌકિકીઃ ।
આશાપાશશતૈર્વિમુક્તહૃદયઃ સર્વત્ર સામ્યં વહન્
લોકે વેષસમાનકર્મનિરતસ્તિષ્ઠ ત્વમજ્ઞો યથા ॥ ૭૩॥

॥ જીવન્મુક્તપ્રકરણમ્ ॥

આત્માનં સમવેત્ય નૈજપદવીમાસ્થાય સંવિન્મયીં

સન્ત્યક્તાખિલવાસનોઽભિરમતે યસ્તન્મયત્વે સદા ।
તં વીરં નિજતત્ત્વબોધકુલિશં સંવિત્કૃશાનું તથા
જાનીયાદુત કાલકાલમભવં મૃત્યોશ્ચ મૃત્યું સ્વયમ્ ૭૪ ॥

ગુણાસ્સુન્દરત્વાદયો યાન્તિ વૃદ્ધિં
વસન્તસ્ય યોગાદ્યથા ભૂરુહસ્ય ।
તથા દૃષ્ટતત્ત્વસ્ય તેજો બલં ધીઃ
નિજાનન્દતૃપ્તસ્ય વર્ધન્ત એવ ॥ ૭૫ ॥

શ઼ૃણ્વન્નેવ યથા કથાં ન શ઼ૃણુતે દૂરં ગતશ્ચેતસા
જ્ઞાની તદ્વદવાસનેન મનસા કૃત્વાપ્યકર્તા ભવેત્ ।
ચેતશ્ચેદ્બહુવાસનં બત નરઃ કર્તાસ્ત્યકુર્વન્નપિ
દેહે સત્યચલેઽપિ પશ્ય પતતિ શ્વભ્રે ગિરેઃ સ્વપ્નદૃક્ ॥ ૭૬ ॥

યાને સુપ્તિમિતસ્ય યાનગમયં સ્થાનં ચ તસ્ય ક્વચિત્
તસ્યૈવાશ્વવિયોજનં ત્રયમિદં યદ્વદ્ભવેદેકધા ।
સુપ્તિં જ્ઞાનમયીં ગતસ્ય વિદુષો યાને વપુષ્યેકધા
તદ્વત્ સ્યાત્ ત્રિતયં ક્રિયાપિ વપુષો નિષ્ઠાપિ નિદ્રાપિ ચ ॥ ૭૭ ॥

જાગ્રત્સ્વપ્નસુષુપ્તિષુ સ્થિતિજુષાં યત્ તુર્યમિત્યુચ્યતે
જાગ્રત્સુપ્તિરિતીરિતં સ્વવિદુષઃ શાન્તં પદં શાશ્વતમ્ ।
સત્યં તદ્ધિ પદં મૃષેતરદિદં ત્વાભાસમાત્રં ત્રયં;
તુર્યાતીતમતસ્તદેવ મુનયઃ શંસન્તિ સંવિન્મયમ્ ॥ ૭૮ ॥

કર્માગામિ ચ સઞ્ચિતં ચ વિદુષો નષ્ટે ભવેતાં ધ્રુવં,
પ્રારબ્ધં ન તથેત્યુદીરિતમિદં ગ્રન્થેષુ મન્દાન્ પ્રતિ ।
પત્ન્યેકા ન સુમઙ્ગલી પતિમૃતૌ બહ્વીષુ યદ્વદ્ભવેત્
ત્રેધા કર્મ તથા વિનાશમયતે નાશં ગતે કર્તરિ ॥ ૭૯ ॥

॥ પરોક્ષજ્ઞાનપ્રકરણમ્ ॥

કુટુમ્બં હ્યેકૈકં ભવતિ સુતભાર્યાદિકમિહ
નૃણામલ્પજ્ઞાનાં; પટુતરધિયાં કિન્તુ વિદુષામ્ ।
કુટુમ્બાનિ ગ્રન્થા અપિ ચ હૃદિ યોગસ્ય નિતરાં
ભવન્તિ પ્રત્યૂહા; ભવતરણમેષાં વદ કથમ્ ॥ ૮૦ ॥

લિપિજ્ઞોઽહન્નામા કુત ઇતિ નિજાન્વેષણધિયા

લિપિં સ્વાં નિર્માષ્ટું લિપિમધિગતો યો ન યતતે ।
લિપિજ્ઞાનાત્ કિં વા ફલમધિગતં તેન કથય
સમો વાગ્યન્ત્રેણારુણગિરિવિભોઽન્યો ભવતિ કઃ ॥ ૮૧॥

અશાન્તસ્ય ક્લેશા વિદુષ ઇહ યે સન્ત્યવિદુષો
ન તે સન્તિ; ગ્રસ્તો ન સ મદપિશાચેન ભવતિ ।
ન વાક્ ચિત્તક્લેશં ભજતિ બહુમાનાર્થમટનં
ન કુર્યાનૈકસ્માદવિતમિહ જાનીહિ તમિમમ્ ॥ ૮૨॥

તૃણતુલિતાખિલજગતાં કરકલિતાખિલનિગમરહસ્યાનામ્ ।
શ્લાઘાવારવધૂટીઘટદાસત્વં સુદુર્નિરસમ્ ॥ ૮૩॥

સ્વતો ભવતિ કઃ પરઃ? કિમપિ કોઽપિ ચેત્સ્વં પ્રતિ
વદેદ્ભવતિ તેન કિં? ગદિતવત્ સ્વયં તદ્ભવેત્ ।
ભિદામનધિગચ્છતઃ સ્વ ઇતિ ચાન્ય ઇત્યવ્યયે
સ્થિતસ્ય સહજે પદે સ્થિરતયા પરસ્મિન્ શિવે ॥ ૮૪॥

ધિયા કુરુષ્વ ભાવનાં સતોઽદ્વયસ્ય સન્તતં
ક્રિયાદ્વયત્વમાચર ક્વચિત્તુ મૈવ સંસૃતૌ ।
કુરુષ્વ ભાવનામિમાં ધિયાખિલે ચ પુત્રક
ગુરૌ તુ ભાવનામિમાં કુરુષ્વ મૈવ કર્હિચિત્ ॥ ૮૫॥

॥ સિદ્ધાન્તસારપ્રકરણમ્ ॥

સિદ્ધાન્તો યો ભવતિ પરમઃ સર્વવેદાન્તસારો
વચ્મિ સ્પષ્ટં તમિમમધુના તત્ત્વતોઽત્યન્તગૂઢમ્ ।
સત્યં તત્ સ્વો ભવતિ નિધનાચ્ચેદહન્નામકસ્ય
શિષ્યેતાસૌ ચિતિમયતનુઃ સત્ય આત્મૈવ વિદ્ધિ ॥ ૮૬॥

॥ ૐ નમો ભગવતે શ્રીરમણાય ॥

॥ શ્રીરમણહૃદયતાત્પર્યસઙ્ગ્રહઃ ॥

વિશ્વં દૃગ્દૃશ્યભિન્નં સ્થિતિલયજનનાન્યેતિ ચિત્તેન સાકં
સ્વપ્ને જાગ્રત્યપીદં ભવતિ ચ, વિલયં ગચ્છતીદં સુષુપ્તૌ ।
એવં વિશ્વં સમસ્તં ભવતિ હિ મનસો વૃત્તયો; નિત્યભાને
જાતં લીનં ચ યસ્મિન્ ભવતિ મન ઇદં, તત્ સ્વતત્ત્વં વિશોકમ્ ॥

અજ્ઞાત્વૈવં સ્વતત્ત્વં વપુરહમિતિ ધીમોહયોગાત્ પ્રપઞ્ચં

મત્વા સત્યં ચ, સૌખ્યં વિષયજમિતિ ચોપૈતિ શોકં પ્રમત્તઃ ।
હિત્વૈતચ્ચેન્નિમજ્જેદ્-હૃદિ વિવિદિષયા સ્વાત્મનઃ, શાન્તિમૃચ્છેત્
સત્યે સ્વસ્મિન્નિતિ શ્રીરમણભગવતા દિષ્ટમસ્મિન્ પ્રબન્ધે ॥

॥ ૐ નમો ભગવતે શ્રીરમણાય ॥

Encoded and proofread by Sunder Hattangadi

The text was composed by K.LakShmana Sarma

This work is published by Sri Ramanasramam www.sriramanamaharshi.org
It has been approved to be posted on sanskritdocuments.org
by permission of Sri V.S. Ramanan, President, Sri Ramanasramam.

*Revelation*
pdf was typeset on April 1, 2025

Please send corrections to *sanskrit@cheerful.com*